श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ एकसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकसप्ततितमः सर्गः ॥

## कबन्धस्यात्मकथा स्वशरीरस्य दाहानन्तरं तेन सीतान्वेषणे श्रीरामाय साहाय्यं दातुमाश्वासनम्

पुरा राम महाबाहो महाबलपराक्रमम्।
रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम्॥ **3.71.1** ॥

यथा सूर्यस्य सोमस्य शक्रस्य च यथा वपुः।
सोऽहं रूपमिदं कृत्वा लोकवित्रासनं महत्॥ **3.71.2** ॥

ऋषीन् वनगतान् राम त्रासयामि ततस्ततः।
ततः स्थूलशिरा नाम महर्षिः कोपितो मया॥ **3.71.3** ॥

स चिन्वन् विविधं वन्यं रूपेणानेन धर्षितः।
तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना॥ **3.71.4** ॥

एतदेवं नृशंसं ते रूपमस्तु विगर्हितम्।
स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति॥ **3.71.5** ॥

अभिशापकृतस्येति तेनेदं भाषितं वचः।
यदा छित्त्वा भुजौ रामस्त्वां दहेद् विजने वने॥ **3.71.6** ॥

तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम्।
श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण॥ **3.71.7** ॥

इन्द्रकोपादिदं रूपं प्राप्तमेवं रणाजिरे।
अहं हि तपसोग्रेण पितामहमतोषयम्॥ **3.71.8** ॥

दीर्घमायुः स मे प्रादात् ततो मां विभ्रमोऽस्पृशत्।
दीर्घमायुर्मया प्राप्तं किं मां शक्रः करिष्यति॥ **3.71.9** ॥

इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम्।
तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा॥ **3.71.10** ॥

सक्थिनी च शिरश्चैव शरीरे सम्प्रवेशितम्।
स मया याच्यमानः सन् नानयद् यमसादनम्॥ **3.71.11** ॥

पितामहवचः सत्यं तदस्त्विति ममाब्रवीत्।
अनाहारः कथं शक्तो भग्नसक्थिशिरोमुखः॥ **3.71.12** ॥

वज्रेणाभिहतः कालं सुदीर्घमपि जीवितुम्।
स एवमुक्तः शक्रो मे बाहू योजनमायतौ॥ **3.71.13** ॥

तदा चास्यं च मे कुक्षौ तीक्ष्णदंष्ट्रमकल्पयत्।
सोऽहं भुजाभ्यां दीर्घाभ्यां सङ्क्षिप्यास्मिन् वनेचरान्॥ **3.71.14** ॥

सिंहद्वीपिमृगव्याघ्रान् भक्षयामि समन्ततः।
स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः॥ **3.71.15** ॥

छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि।
अनेन वपुषा तात वनेऽस्मिन् राजसत्तम॥ **3.71.16** ॥

यद् यत् पश्यामि सर्वस्य ग्रहणं साधु रोचये।
अवश्यं ग्रहणं रामो मन्येऽहं समुपैष्यति॥ **3.71.17** ॥

इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः।
स त्वं रामोऽसि भद्रं ते नाहमन्येन राघव॥ **3.71.18** ॥

शक्यो हन्तुं यथा तत्त्वमेवमुक्तं महर्षिणा।
अहं हि मतिसाचिव्यं करिष्यामि नरर्षभ ॥ **3.71.19** ॥

मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना।
एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः ॥ **3.71.20** ॥

इदं जगाद वचनं लक्ष्मणस्य च पश्यतः।
रावणेन हृता भार्या सीता मम यशस्विनी ॥ **3.71.21** ॥

निष्क्रान्तस्य जनस्थानात् सह भ्रात्रा यथासुखम्।
नाममात्रं तु जानामि न रूपं तस्य रक्षसः ॥ **3.71.22** ॥

निवासं वा प्रभावं वा वयं तस्य न विद्महे।
शोकार्तानामनाथानामेवं विपरिधावताम् ॥ **3.71.23** ॥

कारुण्यं सदृशं कर्तुमुपकारेण वर्तताम्।
काष्ठान्यानीय भग्नानि काले शुष्काणि कुञ्जरैः ॥ **3.71.24** ॥

धक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते।
स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता ॥ **3.71.25** ॥

कुरु कल्याणमत्यर्थं यदि जानासि तत्त्वतः।
एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम् ॥ **3.71.26** ॥

प्रोवाच कुशलो वक्ता वक्तारमपि राघवम्।
दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम् ॥ **3.71.27** ॥

यस्तां वक्ष्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः।
योऽभिजानाति तद्रक्षस्तद् वक्ष्ये राम तत्परम् ॥ **3.71.28** ॥

अदग्धस्य हि विज्ञातुं शक्तिरस्ति न मे प्रभो।
राक्षसं तु महावीर्यं सीता येन हृता तव ॥ **3.71.29** ॥

विज्ञानं हि महद् भ्रष्टं शापदोषेण राघव।
स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम्॥ **3.71.30** ॥

किं तु यावन्न यात्यस्तं सविता श्रान्तवाहनः।
तावन्मामवटे क्षिप्त्वा दह राम यथाविधि॥ **3.71.31** ॥

दग्धस्त्वयाहमवटे न्यायेन रघुनन्दन।
वक्ष्यामि तं महावीर यस्तं वेत्स्यति राक्षसम्॥ **3.71.32** ॥

तेन सख्यं च कर्तव्यं न्याय्यवृत्तेन राघव।
कल्पयिष्यति ते वीर साहाय्यं लघुविक्रम॥ **3.71.33** ॥

नहि तस्यास्त्यविज्ञातं त्रिषु लोकेषु राघव।
सर्वान् परिवृतो लोकान् पुरा वै कारणान्तरे॥ **3.71.34** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे एकसप्ततितमः सर्गः॥